वृक्षभेदे[14] करीरः स्यात् [15]घटे वंशा[16]ङ्कुरेऽपि च ।
देहे दारेषु[17] केदारे क्षेत्रं [18]बुद्धैः(? द्धे) प्रकीर्त्त्यते ॥ ८
श्रेष्ठं कम्बलमे[19]ल्पं च विद्या[20]देकाक्ष(ख्य)या बुधः ।
निर्यूहो निर्गते[21] पीडानिसर्गद्वारभूमिषु ॥ ९
[22]अविशब्दो रवौ मेघे पर्वते[23]ऽपि निगद्यते ।
[24]मृगपर्वतमन्त्रेषु निकृष्टेऽपि च संवरः ॥ १०

---

१ B. वटो वप्रं. २ B. C. केदार. ३ A. B. °पथः ।
४ B. रंगे. ५ B. °ब्दोऽभिधीयते । ६ C. °विचक्षणाः ।
७ C. च. ८ C. °ली मता ॥
९ B. खल्वेति. १० C. मोचा च. ११ B. शुक्रे°.
१२ A. C. °पिच्छे. १३ B. C. बाले. १४ A. C. °भेदः
१५ A. पटे. १६ C. वंध्याकरे° १७ A. दारे च.
१८ B. शुद्धो(द्धे) च की°. १९ B. °मन्नं.
२० B. °देकं क्षयं. २१ B. C. °निर्ग्गता ; A. निर्मिते.
२२ B. अर्च्चिं°. २३ C. °ते च. २४ B. C. शृंग.°

धुनो(?) धवे च दम्भे च गह्वरे गहनेऽपि च ।
न्याये तुल्ये विधौ काले दण्डे वित्ते च कल्प–वाक् ॥ ११
आत्मेति ब्रह्म–धी–देह–मनो–यत्न–धृतिष्वपि ।
पर्याप्तौ शिक्षिते पुण्ये क्षेमे च कुशलध्वनिः ॥ १२
प्रत्ययः शपथे छिद्रे विश्वासास्तित्वहेतुषु ।
पदं स्थाने परित्राणे क्रमे वस्तुप्रतिष्ठयोः ॥ १३
दोषे व्यपगमे दण्डे स्यादत्यय इति श्रुतिः ।
स्वभावे तेजसि स्थाने धामशब्दो निगद्यते ॥ १४
ज्ञाता(तौ) चात्मनि चात्मीये धने स्वाख्या प्रयुज्यते ।
कूटाख्यानृतयन्त्राभ्यां घने मायार्धरेषु च ॥ १५
परिच्छेदे प्रमाणेऽल्पे मात्राख्या परिकीर्त्यते[10] ।
इडाशब्दश्च पानीये भूमौ वा व्यसने मतः ॥ १६
साधु-सत्ता-प्रशस्येषु त्रिष्वेव सदिति ध्वनिः ।
प्रधाने राज्यलिङ्गे च ककुदाख्या [13]प्रवर्तते ॥ १७
मानमण्डनयोर्निष्को निष्को दीनाररुक्मयोः ।
युग्मे(ग्य)संयोगयोरङ्कः स्यादङ्को लेख्यलक्ष्मणोः ।
विशिरस्के नरे नीरे कबन्धाख्या खलेऽपि च ॥ १८
मरौ वृक्षविशेषे च धन्वन्–शब्दश्च कार्मुके ।
अक्षिलोम स्मृतं वर्त्म वर्त्म मार्गश्च कथ्यते ॥ १९
वर्ष्म गृहप्रमाणं स्याद् वर्ष्म देहश्च कथ्यते ।
दायादः सहन(ज)ः प्रोक्तो दायादस्तनयः स्मृतः ॥ २०

---

१ A. धुनी. २ C.–वाग्–. ३ A. °स्तिक्क[शा]नुषु ।
४ B. लक्ष्ये ; C. लक्षे.
५ A. °गते. ६ C. प्रवर्तते. ७ B. °ख्या मृग°.
८ A. °क्षरेऽपि ; B. °करेषु. ९ B. °त्राणे.
१० B. °कीर्तितः(ता), C. च प्रवर्तते । ११ C. °नेषु च ॥
१२ C adds before this
कीकसं शिल्पमित्युक्तं कारु शिल्पं च कथ्यते । महेश्वरो हरः प्रोक्तश्चौरस्तु हर उच्यते ॥
१३ B. प्रकीर्त्यते. १४ cf. st. 54 belaw. A. नागचन्दनयो°.
१५ A. °रुक्जयोः । १६ C. युयुत्सुसंगयो°. १७ C. °स्तु. १८. B. रोम.
१९ C. कीर्त्यते. २० A. हेम° २१ B. कीर्तितः ।

विग्रहो वैयेवस्कन्दो विग्रहो वपुरुच्यते[1] ।
प्रकोष्ठः[2] कूर्प्परस्याधः प्रकोष्ठो द्वारकोष्ठकः ॥ २१
प्रोक्तं वितानमुल्लोचं वितानं शून्यमुच्यते ।
सती दाक्षायणी देवी सच्चरित्राबला सती ॥ २२
वधूर्नारी[3] वधूर्भार्या वधूः पुत्रवधूः[4] स्मृता ।
प्रेक्षे[5] कशिपुरित्युक्तिः प्रावारः कशिपुर्मतः ॥ २३
आडम्बरो गजारावस्तूर्यनादश्च[6] भण्यते[7] ।
कपर्दो[8] हरजूटौघः कपर्दः श्वेतकाकिणी ॥ २४
तूबरो निर्विषाणो गौर्नि[:]स्मश्रुस्तूवरः[9] पुमान् ।
पापीयांसो नृशंसाः स्युर्नृशंसा वन्दिनो[10] मताः ॥ २५
शारदस्तु शरत्कालः स्यादधृष्टश्च[11] शारदः ।
उपह्वरो रहःस्थानं समीपं स्यादुपह्वरः ॥ २६
कश्मलः[12] स्यात् पिशाचश्च[13] कश्मलो मोह उच्यते ।
अवज्ञा कथ्यते रीढा रीढा गतिरपीक्ष(ष्य)ते[14] ॥ २७
प्रस्वेदोऽपि[15] निदाघः स्यात् निदाघो ग्रीष्म उच्यते ।
केतुर्ग्रहविशेषः[16] स्याद् ध्वजः केतुरुदाहृतः ॥ २८
वर्द्धनं छेदनं प्रोक्तं[17] वर्द्धनं वृद्धिरिष्यते ।
कशेरुकं जले कन्दे पृष्ठास्थि स्यात् कशेरुकम् ॥ २९
निर्वातमाश्रयं विद्यादभिन्नः कवचस्तथा ।
कीनाशश्च कदर्यः स्यात् कीनाशौ यमकार्षकौ ॥ ३०

---

१ C. देह उ°. २ C adds before this line:
कीरो वृक्षविशेषः स्यात् कीरः[च] शुक उच्यते । क्लीबश्च कातरः प्रोक्तः क्लीबः षंढः प्रकीर्तितः ॥
३ B. स्तन्य°. ४ B. C. °वधूरपि । ५ C. भक्षः.
६ A. °रैश्वर्यें. ७ B. कथ्यते ।
८ C gives this line after the next one.
९ A. °र्निस्पश्रु°, B. र्नृश्रेष्ठं तू°. १० C. °नः स्मृताः ॥
११ A. °दधृदश्च, B. त्कलपृश्च, C. कलापृष्ठश्च.

१२ B gives this verse after the next one, while C gives the first line of this verse after the first line of the next verse and the second line of this verse after the second line of the next verse. १३ A. B. °चः स्यात्. १४ B. रातिररीक्षते (?) ॥

१५ cf. n. 12 above. १६ B. प्राहुर्व°. १७ C omits this verse.

नागो वृक्षविशेषः स्याद् नागौ वारणपन्नगौ ।
कुलं संघः कुलं गोत्रं शरीरं कुलमुच्यते ॥ ३१

[1]पूगं पूगीफलं ज्ञेयं तथा पूगं कदम्बकम् ।
ज्ञेयाः सुमनसो देवाः कुसुमानि च सज्जनाः ॥ ३२

कुसुमं पुष्पमित्याहुः स्त्रीरजश्च तदाख्यया ।
धवः पतिर्धवो भीरुर्वृक्षजातिर्धवो मतः ॥ ३३

त्र्यम्बकस्ताम्रधातुः स्यात् त्र्यम्बकश्च त्रिलोचनः[2] ।
सिफा सेफालिका प्रोक्ता[3] सिफा शिखा सिफा जटा ॥ ३४

पुण्यं सुविहितं कर्म्म पवित्रं पुण्यमुच्यते ।
[4]ब्रह्म वैज्ञानमित्युक्तं ब्रह्मा पौनर्भवो मतः ॥ ३५

खलो राशिः खलो नीचः खलः पिण्याक उच्यते[5] ।
शाला श्लाघा शिला शाला शाला शाखा च वेश्मनः ॥ ३६

माल्यो [6]मान्यः स्थिरो माल्यो माला माल्यमुदाहृतम् ।
राढा देशविशेषः स्यात् शोभा राढाभिधीयते ॥ ३७

पलं मांसं पलं मानं पलो मूर्खः पला तुला ।
आलिः सहचरी ज्ञेया पङ्क्तिरालिः प्रकीर्त्तिता ॥ ३८

दलमर्द्धं दलं पर्णं दलं हस्त्यादि साधनम् ।
आजिः स्यात् समभूभागः संग्रामोऽप्याजिरुच्यते ॥ ३९

प्रतिज्ञा संगरो ज्ञेयः संग्रामः संगरो मतः ।
उलूकः पुरुहूतः स्यात् पुरुहूतः पुरंदरः ॥ ४०

[7]अमृतं वारि विज्ञेयं देवभोज्यं तथामृतम् ।
कुन्त्या [9]भूमिः समाख्याता कुन्त्या [8]कुन्तकदम्बकम् ॥ ४१

अन्तके[10]ऽजंगरे कुन्ते मृत्युः स्यान्मरणेऽपि च ।
संपा विद्युत् पतिः संपा संपा शङ्खध्वनिर्मतः ॥ ४२

---

१ A. सुमनो(नौ?) कुसुमसज्जनौ ॥ B. सुमनः कुसुमसंज्ञिताः(?तम्) ॥

२ C. महेश्वरः.  ३. B. C. ज्ञेया.  ४ B C omit this line.

५ C. °मिष्यते ।  ६ B. पाल्यं.

७ C gives this verse after st. 47.

८ C. कुंदः कदंबः स्यात्.  ९ A. भूमि°.  १० C. °थाजिरे.

[१]पिण्डेऽर्थे कितवे द्यूते दुरोदर इति श्रुतिः ।
दीप्तौ दृष्टौ च तारासु ज्योतिःशब्दोऽभिधीयते ॥ ४३
[३]रोगार्त्तभाग्यमूढाल्पा मन्दाः प्रोक्ता विचक्षणैः ।
शास्त्रं प्रमाणमिच्छन्ति स्थितिहेतुं च कोविदाः ॥ ४४
[४]हरिणः पाण्डुरो वर्णः कुरङ्गो हरिणो मतः[५] ।
करटः कां[६]तरो ज्ञेयः करटो ध्वाङ्क्ष उच्यते ॥ ४५
कं[७]ङ्करेट्टुः स्मृतो गृध्रः कं[७]ङ्करेट्टुरमर्षणः ।
प्रा[८]ध्वं बन्धनमिच्छन्ति प्राध्वं प्रध्वं च सूरयः ॥ ४६
सौधावयवविज्ञानगमनेषु कला मता ।
[९]तुषारः क्षुद्रपाषाणस्[१०]तुषारस्तुषवेणिषु ॥ ४७
मणिः कोलिंजरो ज्ञेयो मणिको मणिरेव च ।
विषं पानीयमित्युक्तं विषमन्तकरो रसः ॥ ४८
वाजमन्नं गरुद् वाजो[११] वाजं पीयूषमिष्यते ।
व्रजो गोष्ठो[१२] व्रजो मार्गो व्रजः संघो व्रजो गणः ॥ ४९
वीर्यं शुक्रं बलं वीर्यं वीर्यं बीजमुदाहृतम् ।
नक्षत्रस्य मघा नाम कु[१३]न्दस्य कलिका मघा ॥ ५०
द्विजिह्वः सूचको ज्ञेयो द्विजिह्वस्तु भुजंगमः ।
विज्ञेयं शयनं शय्या शय्या पुस्तकसंचयः ॥ ५१
तरसं मांसमाख्यातं तरसं बलमुच्यते ।
वारुणी मदिरा ज्ञेया पश्चिमा दिक्[१४] [च] वारुणी ॥ ५२
मन्दुरा वाजिशाला स्यादावासो[१५] च मन्दुरा ।
सूनृतः शिक्षितो मर्त्यः सूनृतः सत्यवाक् स्मृतः ॥ ५३
[१६]कीकसो वानरोऽभि(पि) स्[१७]यात् कीर्यते चास्थि कीकसम् ।
रोमन्थः स्यात् पशूद्गारो रोमन्थः कीटवर्त्तनम् ॥ ५४

---

१ C omits this verse. २ B व्यतिरे(?). ३ C omits this verse.
४ C gives this line after the second line of st. 46.
५ B. °णः स्मृतः । ६ C. सरटो. ७ B. कंकारंटुः
८ C gives this line before the first line of st. 45.
९ C. सुषारः. १० C. णः सु°. ११ B. वाजं. १२ B. गोष्ठं.
१३ C. पुष्पस्य. १४ C. दिशि. १५ B. C. °सोऽपि.
१६ C gives this verse after the next one. १७ B. °ऽभिक्षः.

[1]हरिद्रा रजनी प्रोक्ता[2] रजनी च विभावरी ।
परिघः परिघातः स्यात् परिघो दण्ड इष्यते ॥ ५५
[3]धरा पृथ्वी धरा धारा धरः शैलो धरा धृतिः ।
[4]क्रतौ क्रोधे तथा दैन्ये मन्युशब्दः प्रचक्ष्यते ॥ ५६
[5]सरलो देवदारुश्च सरलः सरलो मतः ।
बहुलाः कृत्तिका ज्ञेया गावश्च बहुला मताः ॥ ५७
[6]मूलः पुद्गलकः कन्दः कन्दो वारिजं[7] उच्यते ।
[8]मानदण्डनयोर्निष्को निष्को दीनाररुक्मयोः ॥ ५८
करो हस्तः करो रश्मिः करः कर्षकशोधनम् ।
[9]द्वन्द्वे दुन्दुभिरक्षेषु दुन्दुभिः स्यात् तथानकः(के) ॥ ५९
[10]ख्यातं विपिनमुद्यानमुद्यानं ग[11]मनं मतम् ।
उपर्यभ्यधिके प्रस्थे विदुरग्रं विपश्चितः ॥ ६०
निवृत्तावभिधेयेऽर्थो धने चोक्तः प्रयोजने ।
वर्द्धनी वार्[12]घटी (?वा घटी) प्रोक्ता वर्द्धनी तृणकूर्चिका[13] ॥ ६१
कुङ्कुमं रुधिरं प्रोक्तं[14] रुधिरं क्षतजं मतम् ।
नन्दनः स्व[15]समः पुत्रो नन्दनं शक्र[16]काननम् ॥ ६२
[17]मानसं चित्तमित्युक्तं मानसं त्रैदिवं सरः ।
धावनं शो[18]धनं प्रोक्तं धावनं शीघ्रव[19]र्त्तनम् ॥ ६३
[20]स्यन्दनाख्या द्रुमस्रावे स्यन्दनो रथ उच्यते ।
तु[21]रायणमसंगोक्तिः क्रियाहीनै[22]स्तुरायणः ॥ ६४

---

१ cf. p. 15, n. 16. २ B. C. ज्ञेया.

३ C gives this line after st. 57 and construes it with the first line of st. 58. ४ C omits this line.

५ C omits this verse. B omits this line.

६ cf. n. 3 above. ७ B. वारिद.

८ cf. st. 18 above B. C omit this line. ९ A. दण्डे; B. द्वन्द्वो.

१० C. प्रोक्तं. ११ C गगनं. १२ C. वार्धनी. १३ B °कर्णिका ॥

१४ C. चोक्तं. १५ C. सुनयः प्रोक्तो १६ C. सच(?)कीर्तनं.

१७ C omits this verse. १८ B. साधनं. १९ B. °मुच्यते.

२० C. चंदनाख्यो देववृक्षश्चन्दनो. २१ C. परा°. २२ C. °नः परा°.

परायणं रिपुस्थानं तत्परश्च परायणः ।
करिपृष्ठे कुले वेणौ वंशाख्या कविभिर्मता ॥ ६५
जटाजूटे शिखण्डोक्तिः कलापे च शिखण्डिनः ।
शिष्टभाजनदेहेषु पात्रशब्दः प्रचक्ष्यते ॥ ६६
पादत्राणे दले पक्षे लेख्यवस्तुनि पत्र-वाक् ।
द्रव्येऽसिपरिधानेऽपि क्रियापानेऽपि कोश-वाक् ॥ ६७
हंसेऽग्नौ गरुडे चन्द्रे द्विजराजे इति ध्वनिः ।
कैवर्त्तेऽपि च कैवर्त्तः कैवर्त्तः सलिलेचरः ॥ ६८
पिप्पलाख्या जलास्वच्छवस्त्रकर्त्तनवस्तुषु ।
चन्द्रमाश्चन्दनो ज्ञेयश्चन्दनं मलयोद्भवम् ॥ ६९
सकला व्रीहयः सस्यं विज्ञेयाः सस्यमिक्षवः ।
द्वषद्यरण्यसस्ये च कुरुविन्द इति श्रुतिः ॥ ७०
करवीरश्च मारः स्यादङ्कुशः करवीरकः ।
करिणां बन्धनस्थानं वारि वारि जलं मतम् ॥ ७१
मधू(चु)रं भूरि विज्ञेयं भूरि काञ्चनमेव च ।
सूदः स्यात्सूपकारश्च सूदो ज्ञेयः कुरंटकः ॥ ७२
भेषको दुर्जनो ज्ञेयो भषकः सरमासुतः ।
सूतो भास्कर इत्युक्तः सूतः सारथिरुच्यते ॥ ७३
प्रतिरोधकस्तु चौरो दुर्जनः प्रतिरोधकः ।
सौवीरोऽश्मे(श्व)विशेषः स्यात् सौवीरं काञ्जिकं मतम् ॥ ७४

---

१ C gives this line later on (cf. n 19 below.) २ B. °भिः स्मृता ॥
३ C. कपालेषु which must be corrected into कलापेषु.
४ B. °ब्दं. ५ B. प्रचक्षते ; C. प्रवर्तते. ६ C रणे.
७ C. पक्षे°. ८ C. शिष्टपरीवारे. ९ B. °ने च. १० C °गमने.
११ C °ब्ध्वनिः स्मृतः । १२ C. तु १३ C. ध्वनिः १४ C. वारीणां.
१५ C. भूमिर्वि°. १६ C. भूमिः १७ B. °स्तु: १८ A, B. कुडुम्बिकः.

१९ C adds here परायणो रिपो सैन्ये तत्पतिश्च परायणः ॥ (cf. st. 65 above) and ends this मुक्तक just there. इत्यनेकार्थमंजर्यां द्वितीयः ॥ However, there is an Addendum at the end of the Ms., which gives st. 73-78 of this मुक्तक.

२० C. °बोध°. २१ C. °स्व°. २२ C. काञ्जिक.

दौर्मनस्यं घृणा प्रोक्ता घृणा च करुणा मता ।
भङ्गः पलायनं वीचिर्भङ्गो भङ्गश्च भञ्जनम् ॥ ७५
तीक्ष्णं तीव्रं समाख्यातं तीक्ष्णं लोहमुशन्ति च ।
मार्ग्गणो याचको ज्ञेयो मार्ग्गणो बाण उच्यते ॥ ७६
भृङ्गः शिलीमुखः ख्यातो नाराचोऽपि शिलीमुखः ।
भूशुण्डी सूकरः प्रोक्तो भूशुण्डी च कृषीवलः ॥ ७७
मृणालं बिसिनीमूलं मृणालं च जटीपली ।
काव्यास्तु पितरो ज्ञेयाः काव्यं ग्रन्थनिबन्धनम् ॥ ७८
ह्रस्वदीर्घप्लुते [1]ध्वानः कृतपित्तव्यथास्वपि ।
रुक्मं हेम विजानीयाद् रुक्मं रजतमुच्यते ॥ ७९
उत्पलं नलिनं प्रोक्तमुत्पलं कुष्ठमौषधिः ।
[2]वाँसुरा व[3]सँती ज्ञेया [4]वाँसुरा वलभी मता ॥ ८०
रजतं कलधौतं स्यात् कलधौतं च काञ्चनम् ।
वर्णः कृष्णोऽच्युतः कृष्णः प्रोक्ता कृष्णा च पिप्पली ॥ ८१
[5]समवाये यमे देवे संयद्वर इति श्रुतिः ।
शर्व्वरश्चन्द्रमा ज्ञेयः शर्व्वरः शवरो मतः ॥ ८२
महिला रमणी ज्ञेया रमणी वेदिका मता ।
प्रधानं प्रकृतिः सांख्ये प्रधानं विदु[6]रुत्तमम् ॥ ८३
वक्त्रमप्यरविन्दं स्यादरविन्दं सरोरुहम् ।
शृगालो जम्बुको भीरुः शृगालो वरुणोऽपि च ॥ ८४
त्रिदशा मरुतः प्रोक्ता मरुतोऽपि समीरणः ।
[7]मायाशब्दो बुधैरिष्टः [8]स्थूलसत्त्वविशेषयोः ॥ ८५
कुण्डलं मण्डलं ज्ञेयं कुण्डलं कर्णभूषणम् ।
प्रतिबन्धः कुलाधारः प्रतिबन्धः खलक्रिया ॥ ८६
[9]किषिर्गोत्रविशेषः स्यात् [10]किषिः कालः [11]किषिः कपिः ।
[12]कुशिलोऽक इत्युक्तः [13]कुशिर्वैखानसो मुनिः ॥ ८७

---

१ B. °नः । २ B. वागुरा. ३ B. वारुणी. ४ B. वागुरा.
५ B interchanges the two lines of this verse.
६ A. °रमृतम् । ७ B. माला°. ८ A. सून्वद्यनविशेषतः (?) ।
९–११ The reading is doubtful. कपि is denoted by कीश.
१२ A. B. कृषि°. १३ A. कृषि°, B. किषि°.

वर्त्तिर्दीपशिखासूत्रं वर्त्तिर्नेत्राञ्जनोदिता ।
धूम्राटश्च कलिङ्गः स्यात् कलिङ्गो देशवाचकः ॥ ८८
शैले तृणविशेषेऽर्के नृषु [1]गेर्तुरिति ध्वनिः ।
[2]शेलुस्तृणविशेषश्च शेलुः श्लेष्मातको मतः ॥ ८९
[3]शैलः पर्वत आख्यातः शैलः शिलासमुद्भवः ।
वाल्मीकश्च [4]सीमिकैः[5] स्याद् वाल्मीको[6] वाग्विशारदः ॥९०
समाजः कुञ्जरो[9] ज्ञेयः समाजः समयो मतः ।
प्राँजिकः[7] पक्षजातिः स्यात् प्राजिका नीलमक्षिका ॥ ९१
सारसो लक्ष्मणः प्रोक्तो लक्ष्मणो राघवानुजः ।
[8]लक्ष्मणा औषधी प्रोक्ता कथयन्ति मनीषिणः ॥ ९२

इति शब्दरत्नप्रदीपेऽर्द्धश्लोकाधिकारो द्वितीयो[10] मुक्तकः[11][12] ॥

---

१ B. मंमुदिति. Both readings are doubtful.
२–३ B omits these lines.
४ A. समीकः ५ B °को वा. ६ B. समीको वा वि°.
७ A. प्राजितः ८ B omits this line. ९ A omits.
१० B. C. °यः ११ B. कांडः, C omits. १२ B adds समाप्तः

[1]इतः प्रभृत्यनेकार्था ज्ञेयाः प्रत्यंहि [2]सूरिभिः ।
राजा चन्द्रो नृपो राजा पयः क्षीरं पयो जलम् ॥ १
मित्रो भानुः सुहृन् मित्रं दरं छिद्रं दरं [3]भयम् ।
[4]ओघः पूरोऽथ वेगश्च वनं काननमम्बु च ॥ २
[5]इला भूमिर्मता गौश्च संज्ञा चित्तं च नाम च ।
[6]शैलोऽद्रिरंशुमानद्रिर्भा भानुर्भानुरर्यमा ॥ ३
श्रीकण्ठः स्थावरः स्थाणुः हय(?र)च्छागाच्युता अजाः ।
गोविन्दो हरिगोसंख्ये शिवः कृष्णो वृषाकपिः ॥ ४
शरीरोत्सेधयोः कायः सन्धावधिप्रतिज्ञयोः ।
तेजः पुरीषयोर्वर्चो वसतिः स्थाने[10]नक्तयोः ॥ ५
सरित्समुद्रयोः सिन्धुः [11]शालः प्राकारवृक्षयोः ।
चातकापत्ययोः स्तोकः पापव्यसनयोरघः ॥ ६
पिपासालोभयोस्तृष्णा भुवनं तोयलोकयोः ।
[12]मद्याश्वमेधयोः[13] काश्यो वा[14]डवो ह्यग्निविप्रयोः ॥ ७
निस्त्रिंशौ खड्गपापिष्ठौ भृङ्गबाणौ शिलीमुखौ ।
[15]मौनमण्डने निष्कौ स्तो बाष्प उष्मा तथाश्रु च ॥ ८
वृक्षजातिगजौ पीलू प्रदरौ रोगमार्गणौ ।
[16]सूकरोष्ट्रौ च करभौ हावौ [17]क्रन्दनविभ्रमौ ॥ ९
[18]वेनवह्नयनलौ दावौ जीमूतौ मेघपर्वतौ ।
वल्लवौ सूदगोपालौ चिकुरौ केशचञ्चलौ ॥ १०

---

१ B. अत: २ B. वेदिभिः ३ A. गृहम्.

४ C gives this line along with the two succeeding lines later on. cf. n. 12 below. ५ cf. n. 4 above. ६ B. °मिः स्मृता.

७ A. cf. n. 4 above. ८ C. °गश्च उच्यते ।

९ C omits. १० B.° कूपयोः । ११ B. सालः

१२ C gives the three lines mentioned in n. 4 above, between the two lines of this verse

१३ C. मद्यमध्यमयोः । १४ °वश्चाग्नि°. १५ B C omit this line.

१६ C gives this line and the succeeding one after the first line of st. 11. १७ A. स्कन्दन°. १८ cf. n. 16 above. C. वनवह्नपत्यग्नि(?न)लौ.

अरिष्टपिष्टकौ कल्कौ वृषौ[2] दानववैरिणौ ।
[3]पङ्गुपद्मारुणौ श्रोणावम्बरौ व्योमवाससी ॥ ११

उदाना[4]ख्यौ मरुद्बन्धौ [5]निस्रंसौ वटदुग्धिलौ ।
[6]ध्वाङ्क्षः काको बको ध्वाङ्क्षो नगः शैलो नगो द्रुमः ॥ १२

खटो ह्रस्वः खटः क्रूरः क्षितिः पृथ्वी क्षितिः क्षयः ।
क्षेयं गेहं क्षयो ह्रासः श्रमः खेदः श्रमः क्रिया ॥ १३

कण्ठो विधिर्गलः कण्ठः प्रहिः कूपः प्रहिः सरः ।
[7]उन्दुरे सूकरे कोलः कलिः कलहकालयोः ॥ १४

शशाङ्कस्वर्णयोश्चन्द्रः किरिः सूकर[9]लोहयोः ।
बर्हिर्दर्भौ[10] जलं [11]बर्हिर्लाङ्गलं हलमम्बु च ॥ १५

निमित्तहृदये हेतू [12]हीरौ वज्रमहेश्वरौ ।
काश्मीरकशुकौ कीरौ वीरौ विक्रमबान्धवौ ॥ १६

कौशिकौ वासवोलूकौ [13]सायकाविषुमार्गणौ ।
[14]मार्गणो याचको बाणो मार्गणं मृगमांसता (?) ॥ १७

[15]ध्वान्ताचलौ मतावन्धौ मयूराग्नी शिखण्डिनौ ।
[16]कमरः[17] कोमले [18]काम्ये [19]समरो [20]युद्धसंघयोः ॥ १८

---

१ C adds मयोष्ट्र(? ऽश्वः) करभः प्रोक्तो लक्ष्मीर्मा च प्रचक्ष्यते ।
कं पानीयं जलं प्रोक्तं नीहारं हिम उच्यते ॥ २ A. वृशौ.

३ पङ्गु is denoted by श्रोण, not by श्रोण.

४ A. [उ]दाना°, C. उदना°. उदान is a kind of मरुत्, but बन्ध is denoted by उद्दान, not by उदान. ५ C. कामं शक्रशरासनम् ।

६ C interchanges this line with the second line of the next verse.

७ cf. n. 6 above. A. B. वराहे. C. उन्दिर(?)रे. ८ C omits this line.

९ A. °कोलयो: १० B. °बर्हो°, C. °दर्प्तो. ११ B. C. वह्नि°.

१२ C. हरौ. १३ C. सर्पिकौ(!) वर्षि°(?). १४ B C omit this line.

१५ C. ध्वांतावतौ(?) च व्याधौ च शिखिनौ वह्निपावकौ । A. B. मतौ वन्ध्यौ

१६ C gives this line after st. 20. Cf n. 4 on p. 22.

१७ A. कसरः, B. कमलं, C. शूकरः १८ C काव्यो(?).

१९ C. समयो (?) २० B. सन्धियुद्धयोः, C. बन्धसोमयोः (?)

[1]उत्सङ्गे सूकरे क्रोडो वत्सः स्व(? त)र्णकपुत्रयोः ।
कान्त्यनातपयोश्छाया दया हिंसानुकम्पयोः ॥ १९
द्रुमो वृक्षे पुराणेऽन्ये ध्रुवो निश्चितनित्ययोः ।
संघाते पूरणे पूरः सूरः सूर्यनरेन्द्रयोः ॥ २०
[3]धीरौ सात्त्विकधीमन्तौ वरौ श्रेष्ठहुताशनौ ।
पतङ्गौ शलभादित्यावर्कौ स्फाटिकभास्करौ ॥ २१
गुह्यं कार्ये च कौपीने संज्ञे स्तो नामचेतने ।
मधुरौ च प्रियस्वादू शम्भू ब्रह्ममहेश्वरौ ॥ २२
कार्यरिद्धौ तथा कृत्यौ बभ्रू नकुलपिङ्गलौ ।
स्पष्टप्राज्ञौ स्मृतौ व्यक्तौ दीप्तिः स्वेच्छा तथा रुचिः ॥ २३
नित्यं स्वं च निजं प्रोक्तं बलदीप्तौ तथौजसी ।
हायनं वर्षमोजश्च हेती शस्त्रार्चिषी मते ॥ २४
आशासंज्ञे ककुप्तृष्णे स्तनमेघौ पयोधरौ ।
अभिरूपं बुधे कान्ते जामिः स्वसृकुलस्त्रियोः ॥ २५
उदयाधिगमौ प्राप्ती वह्निसूर्यौ विभावसू ।
वृजिनं मलिने पापे प्रज्ञानं बुद्धिचिह्नयोः ॥ २६
असन्मायाविनौ लीकौ वीर्यौद्यमौ पराक्रमौ ।
वराके मूषके दीनः प्लवकः कपिभेकयोः ॥ २७
यज्ञः पूजा च दानं च इष्टिभी(?री)क्षौ तथा मते ।
चीवरं वल्कले वस्त्रे कृष्णं काले तथोदरे (?) ॥ २८

---

१-२ C gives these verses after the first line of st. 21, where they read as follows :

C. वलांगः(?) सूकरक्रोडौ वत्सस्वकर्ण(!)पुत्रकौ । कान्त्यनातपशा(?) छाया दया हिंसानुकंपयोः ॥
...मो वृक्षेषु रत्नेषु [ध्रु]वो निश्चितनिश्चयो(?)ः । संघाते पूरणे पूरः शू(?सू)रः सूर्यनरेश्वरः(?)॥

३. C. वीरौ.

४ C gives st. 19-20 here and the second line of st. 18 thereafter. This marks the end of this canto, expressly stated as इत्यनेकार्थरत्नतृतीयोऽध्यायः ।

५ B. कनक°

६ The reading in B is not legible. लीकौ here seems to be intended for अलीकौ.

७ B. भीरुः

८ B प्लवः कपिक°

९ A. B. ध्रुतौ (!).

१० B. चीवरो.

[१]श्रोत्रश्च श्रवणे कर्णे तातस्तु पितृपुत्रयोः ।
कुट्टिमे शफरे मत्स्यो रूपं मूर्तौ विदुर्विधौ[२] ॥ २९
[३]अवटौ कालगर्तौ च निमित्ते हेतुर्[४]लक्षणे ।
हिते शक्ते समर्थः स्यात् प्रशान्त(?न्ता)कठिनौ मृदू ॥ ३०
स्थूलौ जडबृहन्तौ [च] विप्राश्च दशना द्विजाः ।
असदप्रियावलीकौ सहायप्रणिधी [५]मतौ ॥ ३१
[६]रचितोऽयमनेकार्थो यथास्मृति [च] युक्तके तृतीयेऽपि ।
[७]उपजयतां सौभाग्यं पठतां श्रद्धावतामनिशम् ॥ ३२
[८]इति [९]शब्द[रत्न]प्रदीपे [पादाधिकारः] तृतीयो[१०] मुक्तकः[११] ॥

---

१ A. B. नौजुष्ट.°  २ A. °वृके.  ३ A. अवयौ.  ४ B °लक्ष्मणे.

५ The reading is doubtful. It represents the main word, given in nom. dual.  ६ B adds अत्रार्या before this verse.

७ उपजीयात् ? Or उपजायतां सुभाग्यं ?  ८ B. C. इत्यनेकार्थः  ९ B. C. omit.

१० B. °थः  ११ B. कांडः, C. °ऽध्यायः  १२ B adds समाप्तः

# चतुर्थो मुक्तकः ।

यो जयेद् राजसूयेन मण्डलस्येश्वरश्च यः ।
पृथ्वीं प्रशास्ति यस्याज्ञा स सम्राडभिधीयते ॥ १

[2]सबुद्धिः सचिवो राज्ञस्तन्मन्त्रं निश्चिनोति यः ।
नियुक्तः कर्म्मणि प्राज्ञः स कर्मसचिवो मतः ॥ २

यो रा[3]जरक्षवर्ग्गः स्यात् सोऽनीकस्थो निगद्यते ।
अन्तःपुरे येऽधिकृतास्तेऽन्तर्वेश्मिकसंज्ञकाः ॥ ३

[4]यथार्थयुक्तस्तु चरः प्रणिधिः प्रणिगद्यते ।
एष ग्रामाधिकृत्यश्च स्थायुष(?कः) पुरुषो मतः ॥ ४

षण्ढो वर्षधरः प्रोक्तो द्यूताध्यक्षश्च सारिकः ।
विषयानन्तरं शत्रुर्मित्रं च तदनन्तरम् ॥ ५

यो लक्ष्याच्युतबाणः स्यात् सोऽपराद्धेषुर्भण्यते ।
कलिविन्यसनं व्यूहो वाज[ः] पक्षो भवेदिषोः ॥ ६

प्रत्यासारं विदुः प्राज्ञाश्चमूजघनमाहवे ।
प्रत्यरि सेनागमनं जानीयादभिषेणक(?न)म् ॥ ७

तुरङ्गरथपत्तीभं सेनाङ्गमभिधीयते ।
स्यात् प्रतिसर आरण्यः प्रतिरोधः समापेनम् ॥ ८

वृत्ते वर्त्स्यति वा युद्धे पानं स्याद् वीरपानकम् ।
चापध्वनिश्च विस्फारः कबन्धमशिरो वपुः ॥ ९

निबन्धनं मेखलाद्यैर्मङ्गस्य ग्रहणं स(?द)मः ।
वरूथो रथगुप्तिश्च गुल्मं सञ्जनमिष्यते ॥ १०

पुरुषो रिपुयुक्तो यः उ(?अ)पसय्य(?र्प्प)ः स भण्यते ।
तदभिभयमाख्यातं सबलाद् भयमेव यत् ॥ ११

---

१-२ B interchanges these two verses.
३ B. राजा. ४ It must be चरो यथार्थयुक्तस्तु
५ A. पुरुषोत्तमः ६ A. °गाध्ये°, B. °राधे° ७ A. षेणा°, B. क्ष्वेमा°.
८ B. परिसेधः ९ A. °पना ॥ १० A °कृ°, B. °र्थ मत्कस्य.
११ B omits this verse.

विषलिप्तफलो बाणो यः स दिग्धे इति स्मृतः ।
दुरापेऽपि च कृत्ये यः स्यादनैव[3]स्थितक्रियः ॥ १२
महोत्साहः स विज्ञेयः पुरुषः कृतनिश्चयः ।
बृंहितं स्तनितं प्रोक्तमालानं बन्धनं मतम् ॥ १३
मदो दानं गजेन्द्राणां वमथुः[4]करिसीकरः ।
दन्तान्तप्रतिमानं च सृणिरुक्तस्तदङ्कुशम् ॥ १४
बिन्दुजालं शरीरोत्थं पद्मं विज्ञाः प्रचक्षते ।
आधोरणो नियन्ता स्यान् निषादी प्राजिता गजी(?) ॥१५
आजानेयः कुलीनोऽश्वः [5]पोतः प्रोक्तः किशोरकः ।
काम्बोजश्चैव बाल्हीकः साधुवाही विनीतकः ॥ १६
प्रोथं घोणान्तरं प्राहुर्द्वैरितं वलितं मतम् ।
अश्वकाङ्गः स्मृतो वाजी मृगयायां विचक्षणः ॥ १७
चक्रं चापस्करं विन्द्यात् कूबरं युगमध्यगम् ।
श्रेयमिष्टफलं दैवं तद्विपर्यासतोऽनयम् ॥ १८
इष्टार्थानर्थयोर्दूराद् दीर्घदर्शी इति स्मृतः ।
[9]वेहद् वृषोपगा गौः स्यादुत्तमा नैचिकी मता ॥ १९
काल्याऽथ सर्व्यप्रजने समाना च सवर्णिका ।
दुह्यमानाप्यसंदाना सुव्रतेति निगद्यते ॥ २०
दोहकाले पयोहीना संधिनीति विधीयते ।
प्रौढो वत्सो वत्सतरः प्रष्ठौही गर्भिणी मता ॥ २१
विद्याद् दध्यघनं द्रप्सं [10]घृतं सर्पिर्निशान्तरम् ।
हैयङ्गवीनमित्युक्तं नवनीतं विचक्षणैः ॥ २२
समा गिरेः क्षितिः सानुरधःस्थानादुपत्यका ।
परं तीरं विदुः पारमर्वागवारमावचुः ॥ २३

१ B. विष.    २ B omits.    ३ A. °प्रतिक्रिया ।
४ A. कर°.    ५ A. पासिताप्रजः, B. सासितप्रतः
६ B. स विज्ञेय[:] किसेवकः    ७ B. स्मृतिः    ८ A. वृ.
९ B. सावधेनुर्नि°.    १० A. रतं, B. हतं.    ११ B. सर्पिः प्रयानकम्.
१२ A. °परमावचः, B. °परमेवचः

राजहंसाः सिता रक्तैर्मल्लि[1]नैर्मल्लिकाभिधाः ।
विश्रुताश्चरणैर्हंसा धार्तराष्ट्राः सितेतरैः ॥ २४
मध्यं प्रकोष्ठमित्युक्तमरत्निमणिबन्धयोः[2] ।
कनिष्ठामणिबन्धान्तः करभः करपार्श्वगः[3] ॥ २५
ज्येष्ठा कनिष्ठा निकटे तत्प्रदेशिन्यनामिका ।
बाहोश्च प्रसृताङ्गुल्योरन्तरं व्याम उच्यते ॥ २६
प्रादेश–ताल–गोकर्ण–वितस्तय उदाहृताः ।
तर्जन्यादिभिरङ्गुष्ठे वितताभिः [4]क्रियापरैः[5] ॥ २७
प्रसारिताङ्गुलिः प्राज्ञैः करः प्रतलमुच्यते ।
कृतमुष्टिः स रत्निः स्यादरत्निर्विंतताङ्गुलिः ॥ २८
पुच्छं प्रकीर्णकं सिक्तं कल्यं मद्यं चिरोषितम् ।
चतुर्विधं स्मृतं वस्त्रं त्वग्युक्तं[6] कृमिरोमजम् ॥ २९
महाधनाख्यमित्युक्तं बहुमूल्यं विचक्षणैः ।
पौष्पं मधु [7]मकरन्दं गुल्मस्थं स्तबकं बुधैः ॥ ३०
बन्धनं वृन्तमिच्छन्ति विटपं तरुविस्तरम् ।
संभाविताऽस्मिका( ? ता) दर्पादाहोपुरुषिका मता ॥ ३१
फलं सुस्वादु पक्वं स्यात् [8]पदं(?)[9] पुष्टमुच्यते ।
जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ॥ ३२
[10]वाक्यं पदसमूहः स्यादौह्येसाध्यमकारणम् ।
लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम् ॥ ३३
नितान्तं मधुरं सान्त्वं परुषं निष्ठुरं वचः ।
असङ्गाष्यं बहुभाष्यमसंबद्धं निरर्थकम् ॥ ३४

---

१ A. °लिना°. २ B. °योः ३ A. कृपा°. ४ B. °रैः ५ A. तिस्थं, B. °वथं.

६ According to this reading only three types are specificd, one type ( viz. फालं ) being left out. Hence the reading may be amended as त्वक्–फल–कृमि–रोमजम्. ( cf. त्वक्–फल–कृमि–रोमाणि वस्त्रयोनिः in Amara-Kos'a, II, 6, 110.) ७ B. करं दण्ड.

८ B omits the last three quarters of st. 32 as well as the first quarter of st. 33, and construes the first quarter of st. 32 with the second quarter of st. 33. ९ May it be प्रदं ?

१० B replaces the first quarter of this st. by that of st. 32. (cf. n. 8 above.) ११ The reading seems doubtful.

कल्या कल्याणवाचोक्ता सत्यकल्पा प्रियाप्रिया ।
पूर्वापरोक्तमक्लिष्टं[1] हृद्गतं स्वगतं मतम् ॥ ३५
[2]स्पष्टं चित्रपदं नाम ग्राम्यमश्लीलमुच्यते ।
काञ्चनं रजतं[3] प्रोक्तं हिरण्याख्ये कृताकृते ॥ ३६
आहते च स्मृते रूप्ये ततोऽन्यत् कुप्यमुच्यते ।
भूषणं कनकं शृङ्गी गवाद्यं पादबन्धनम् ॥ ३७
वेश्यावासोऽपि वेशः स्यादातोद्यं मुरजादिकम् ।
अर्थप्रयोगमाचार्याः कुशीदं परिचक्षते ॥ ३८
वार्द्धुषिक्यं च तद्वृत्तिस्तत्क्रिया च विकूणिका ।
स्यातां ग्राहकदातारावधमर्णोत्तमर्णकौ ॥ ३९
कुमुदः प्रतिभः श्वेतो बभ्रुः कनकपिङ्गलौ ।
रक्तश्यामः स्मृतो धूम्रः पिशङ्गो [4]रोचनाप्रभः ॥ ४०
मेचकः शिखिकण्ठाभो हरित् श्यामोऽसितासितिः ।
आरक्तः पाटलो वर्णः शोणः कोकनदारुणः ॥ ४१
आसारो वेगवान् वर्षः प्रावृडम्भोधरागमः ।
शीकरः पवनास्ताम्बु मेघाग्निः स्यादिरम्मदः ॥ ४२
वृष्ट्या संभूतशस्यो यः स देशो देवमातृकः ।
नद्यम्बुवृद्धशस्यो यः स नदीमातृको मतः ॥ ४३
वरपूर्वा तु या नारी सोच्यते दिधिषूरिति ।
सोऽग्रेदिधिषुराख्यातः पुरुषस्तत्पुरन्ध्रिकः ॥ ४४
खगा मृगाः स्मृताश्छेकाः सर्वदैव गृहे रताः ।
यदुष्ट्रिकादिकं[6] भाण्डं तदेवाऽऽवपनं मतम् ॥ ४५
रजतादिकृतं तत् स्यात् भृङ्गारं जलदायकम् ।
अवकेशी फलैर्वन्ध्यः सर्वलोहं च तैजसम् ॥ ४६
व्याख्याता भैक्षदाता च प्राज्ञैश्च विकुलाविति ।
स्थानं मूलादधिष्ठानात् शाखानगरमुच्यते ॥ ४७
संसप्तकाश्च समये संग्रामादनिवर्त्तिनः ।
[9]पद्याऽतः पथसंबन्धो गव्यूतिः क्रोशकद्वयम् ॥ ४८

---

१ °श्लेषं. २ B. स्पृ°. ३ A. °ते. ४ B. च(?क)नक°. ५ A. °वर्षः स्यात्.
६ B. धनं (?) ७ B. तरु°. ८ B. °तो दाता. ९ B. ञ° (?)

आगन्तुवर्तमानाभ्यां सहाहोभ्यां च पक्षिणी ।
श्रुतिविद्भिः स्मृता रात्रिः पुण्या हवनकर्मणि ॥ ४९
चिररात्रमिति ख्यातं चिरकालं च सूरिभिः[1] ।
गणरात्रं तथा रात्रिर्बहुशश्चाभिवासिता[2] ॥ ५०
तत् शल्लीकमाख्यातं प्रच्छन्नं शल्लैरपि ।
अन्तर्गतास्थिकं कुड्[3]यमेडूकं कवयो विदुः ॥ ५१
[4]पञ्चरागिकवस्त्रेण निर्मिताः पुत्रिकास्तु याः ।
पञ्चालिका इति प्रोक्ता बालक्रीडनकाश्च ताः ॥ ५२
सपरिच्छदकन्यायाः प्रदाता कू[5]कदो मतः ।
सोपप्लवस्थितो भानुरुपरक्तोऽथवा शशी ॥ ५३
पोगण्ड इति विख्यातो देहेन विकलः पुमान ।
मासौ द्वौ चैत्रवैशाखौ तावेव मधुमाधवौ ॥ ५४
ज्येष्ठाषाढौ तथैव द्वौ प्रोक्तौ शुक्रशुची इति ।
नभः श्रावण इत्युक्तो नभस्यस्तदनन्तरः[6] ॥ ५५
इषोर्ज्जाविति विज्ञेयौ मासावाश्विनकार्तिकौ ।
स्यातां सहःसहस्यौ द्वौ मार्गपौषौ यथाक्रमम् ॥ ५६
तपस्तु माघ इत्युक्तस्तपस्यः फाल्गुनो मतः[7] ।
एकसर्गजनं विन्द्यादेकायनमिति [8]स्फुटम् ॥ ५७
अनेडमू[9]क इत्युक्तः श्रोतुं वक्तुं च यः क्षमः ।
समरात्रिदिनं कालं विषुवन्तमुशन्ति च ॥ ५८
वात्या वातसमूहः स्यादिल्वला मृगतारकाः ।
राकानुमतिराचा[10]र्याः पौर्णमासीद्वयं विदुः ॥ ५९
राका संपूर्णचन्द्रा स्यात् कलोनाऽनुमतिः स्मृता ।
[11]शिनीवालप्रमाणोऽर्कसांनिध्ये यत्र चन्द्रमाः ॥ ६०
दृश्यते सा त्वमावास्या शिनीवालीति भण्यते ।
कुहे(? हि)ति कोकिलाध्वाने कलामात्रं विधौ स्थितिः ॥ ६१

---

1 B. मनीषिणैः  २. B. °र्बहुलश्चासितासितम् (?)  ३ A. °ण्डय°.
४ Before this line B adds लोकोऽयं भारतं वर्षं पूर्णस्यादामुषामता(?) ।
५ A. स्ककुदो.  ६ B. °रम्.  ७ B. °नः स्मृतः ।  ८ B. स्मृतम्.
९ B. °कश्च.  १० B. °ख्याता.  ११ A. शि(सि)ता°, B. सिनी°

यत्रोपि स्यादमावास्या नष्टचन्द्रा कुहूरिति ।
ऋचो यजूंषि सामानि कर्मविद्या त्रयी मता । ६२
आन्वीक्षिकी तर्कविद्या वार्त्ता कृष्यादि कर्मभाक् ।
समग्रमर्थशास्त्राणि दण्डनीतिरितीष्यते ॥ ६३
मन्वादिर्धर्मशास्त्राणि स्मृतयः स्मरणादपि ।
ऋग्यजुषोरधीती यः स होताऽध्वर्युरिष्यते ॥ ६४
सान्नाय्यं हविरेव स्यादुद्गाता सामतो मतः ।
आषाढो व्रतिनां दण्डः सोमपीथीति सोमपः ॥ ६५
स्वसंस्काराद् द्विजो भ्रष्टो व्रात्य इत्यभिधीयते ।
त्यक्ताग्निर्वीरहा प्रोक्तो दीक्षितो मखसोमपः ॥ ६६
यजमानः स्मृतो यष्टा हुताग्नौ च वषट् कृतम् ।
इष्टापूर्तं[11] ध्रुवं[12] [13]दानमन्यत् पूर्वमुदाहृतम् ॥ ६७
ब्रह्मस्वाध्यायसंवृत्तिर्ब्रह्मचर्यं समिष्यते ।
अभिमन्त्र्य हुतं सम्यग् विन्द्यादुपाकृतं पशुम् ॥ ६८
अन्वाहार्यं विदुः श्राद्धं मासिकं विधिकोविदाः ।
दर्शस्त्वेवंसितपक्षान्ते सदस्या विधिदर्शिनः ॥ ६८
[15]दिव्यः स्यादिति सत्रस्य शेषं प्राज्ञैरुदाहृतम् ।
सिद्धश्चाष्टगुणैर्युक्तस्त्रिवर्गो धर्मपूर्वकः ॥ ७०
प्राचीनावीती विख्यातः सत्यपाणौ समुद्धृते ।
हव्यं दैवे विधातव्यं पैत्रे कव्यमिति स्मृतम् ॥ ७१
योषिद् मुख्या वरारोहा वीरा स्यात् पतिपुत्रिणी ।
प्रसाधनज्ञा स्ववशा सैरन्ध्रीति निगद्यते ॥ ७२
कात्यायन्यर्द्धवृद्धा च सा राजवरवर्णिनी ।
मध्यस्थानं भ्रुवोः कूर्चस्तारकाऽक्षिकनीनिका ॥ ७३
स्त्रीणां पूर्वकटीभागं जघनं कोविदा विदुः ।
नितम्बमपरं भागं गुल्फं पादस्य पूर्वतः ॥ ७४

१ B. °त्र सा. २ A. °र्व°, B. °स्या°. ३ A. °र्व°. ४ B. °दिभिः
५ A. °पाणी(? नी)°, B °पी[थी]°. ६ A. °दिना. ७ A. न°.
८ B. नष्ट°. ९ A. तप्र(? दि)ष्टे. १० B. °ती ११ A. °थं.
१२ A. °व°, B. °वो. १३ A °नादं ह्मात् १४ A.B. °स्या°.
१५ B omits this line. १६ A. त्व°.

मुखान्तरालमाख्यं स्यात् पूर्वे संधिश्च लक्षणे ।
दृष्टे यत्र प्रसीदन्ति नयनानि मनांसि च ॥ ७५
प्रासादः स तु विज्ञेयः सौधः स्यात् श्नुधया सितः ।
मन्त्रोद्धारविधानज्ञः क्रियाकाण्डविशारदः ॥ ७६
आचार्यः प्रोच्यते सम्यक् स्वाम्नायेन च आचरन् ।
उपेत्याधीयते यस्माद् वाङ्मयं समुपागते ॥ ७७
उपाध्यायः स विज्ञेयो वृत्तिमात्रोपजीवकः ।
उपमर्दाग्निवैमल्याः तण्डुलाः पाकयुक्तितः ॥ ७८
प्रमाथितेन ते मन्दाः क्लिन्नत्वादोदनः स्मृतः ।
मुद्गादिदलप्रस्विन्नाः स्वच्छाः स्वपस्निमाययोः(?) ॥ ७९
प्राच्यादीनां दिशां देवाः पालनाद् विदिशामपि ।
दिक्पाला इति विख्याताः शक्रवह्नियमादयः ॥ ८०
पाञ्चजन्यं विदुः शङ्खं हरेश्चक्रं सुदर्शनम् ।
कौमोदकी गदा शार्ङ्गं कार्मुकं नन्दकस्त्वसिः ॥ ८१
[4]शिवस्य समिध्या(?) वारिस्वशब्दं स्थिरमेव च ।
शिवगङ्गेति विज्ञेया [5]दुष्प्रापा दुष्कृतात्मना ॥ ८२
नाम गोत्रं च मन्त्रं च या अभिव्यापकाः स्वयम् ।
सुनृणां काव्यपिण्डस्य विज्ञेयाश्चित्रधेनवः ॥ ८३
उत्पत्तिः प्रलयो वंशा मन्वन्तर-विनिर्णयः ।
वंशानुचरितं यत्र तत् पुराणमिति स्मृतम् ॥ ८४
नाम्ना येऽणादयः सिद्धाः समासविधिनापि ये ।
शब्दास्ते वाक्यतो धातोर्बोद्धव्याः कविपुंगवैः ॥ ८५
[7]मुक्तक एव चतुर्थो गुणभोग्यः [8]संनिवेशितः शब्दैः ।
वाक्यविबोध्यैर्नित्यं [9]नितरां [10]सुश्रूयते लक्ष्मीः ॥ ८६
[11]इति [12]शब्दरत्नप्रदीपे [13]चतुर्थो[14] [15]मुक्तकः समाप्तः ॥

---

१ B. °दुर्धे. २ A. °विचक्षणैः ३ A. °साधि°, B. °सातिनेमे.
४ A omits this line. ५ B. सुप्रापा सुकृतात्मना । ६ B. °तोःस्मर्तव्याः
७ B adds before this: 'आर्या ॥' ८ B. संनिधिशब्दैः ९ A. वितरतु.
१० A. सघुषं (?) वै. ११ B omits. १२ A omits.
१३ B adds श्लोकाधिकारः ' १४ B. °र्थं°. १५ B. काण्डः

## पञ्चमो मुक्तकः ।

स्थानान्तरप्रधानत्वाद् व्यामिश्रा भवंतोऽपि च ।
साम्प्रतं पृथगुच्यन्तेऽनेकार्थवाचकाव्ययाः ॥ १
समुच्चये विकल्पोक्तौ व्यभिचारे व्यवस्थितौ ।
औपम्येऽतिशये हेतौ चकारोऽन्वाचयादिषु ॥ २
व्यवच्छेदे विवक्षायां विकल्पौपम्यहेतुषु ।
पक्षान्तरविनिर्णीतौ वा-शब्दः स्यात्समुच्चये ॥ ३
हि स्फुटे हा विषादोक्तौ हन्त निर्दिष्टबोधने ।
हासोपहाससंवित्तिभावसंबोधनादिषु ॥ ४
अहो साकल्यसाहित्यवृत्तिमात्रेषु दृश्यते ।
परं वा निश्चयेत्यर्थ-व्यवच्छेदकृतार्थयोः ॥ ५
पश्चात्सत्यवितर्केषु न परेति विनिश्चये ।
हर्षविस्मयखेदेषु बत-शब्दो निबध्यते ॥ ६
किल संख्याक्तौपम्यपूर्वसूचनहेतुषु ।
असंबुद्धौ निषेधे च वाक्यस्मरणयोरपि ॥ ७
अतिरक्तौ विषादे च न संबुद्धिनिषेधयोः ।
आमित्येवमतीते स्म मा स्म चेति निगद्यते ॥ ८
इतीव संभावनौपम्यपादपूरणहेतुषु ।
नु वितर्के द्रुतेऽह्न किमुत प्रश्नवितर्कयोः ॥ ९
उपहासे विषादे हि स्फुटानन्तरयोरुत ।
मिथोऽन्योन्यं ततश्चातः पुनः स्याच्च विनिश्चये ॥ १०
अन्तरेणान्तरा-शब्दौ व्यतिरेकोदितौ(?)[१०] विना ।
सुष्ठु प्रायः प्रगे प्रातः पुनरत्वर्थतथ्ययोः ॥ ११
अहर्मात्रणकाः (?) प्रोक्ता वैतथ्यार्थोद्धृता मुधा ।
अयीत्यामन्त्रणौत्सुक्ययुक्तिसंभावनादिषु ॥ १२

---

१ A व्याधिः सं°, B. °श्रं. २ A. °वि°. ३ A.° र्था चायं (?), B. °स्तुवाचकाः (?)
४ B. ताः ५ A. हे. ६ B. °गद्यते. ७ B. °स्तथा.
८ B. मिथ्याऽलीके मिथोऽन्योन्यं ९ B. न पुनर्ननु निश्चये । १० A. रिता°(?).
११ A. °ती! १२ B. प्रातु°. १३ B. °परस्परौ. १४ B. अन्हे/ आमं वणे (?)
१५ B. भ्रष्टतानुयोः (!)

अहो संभावनालापसंभ्रमामन्त्रणेषु च ।
अरे अनादराख्यायं स्थाने युक्तमितीष्यते ॥ १३
संभावने वितर्के च ए हे हाऽऽमन्त्रणे द्वयम् ।
नु संबुद्धौ(?) न्योन्यं नीवेद्यदि(?) समुच्चये ॥ १४
स्वीकारे ऊररी ऊरी उरी बोधनिषेधयोः ।
वायुश्च जवितो मङ्क्षु वै स्फुटार्थस्य संमतः ॥ १५
आहोस्विदथवेत्यर्थे आनन्तर्ये तथा अहो ।
आश्चर्यपदसंबुद्धिसंभावेषु निगद्यते ॥ १६
एवावधारणे जातु कदाचित् खलु निश्चये ।
मा निषेधे अभावे च दिष्ट्यानन्दे मृषाऽनृते ॥ १७
अतन्द्रातादि(?)शीघ्रार्थे अञ्जसा सहसा द्रुतम् ।
अथाऽऽनन्तर्यमाङ्गल्ये प्रश्नधिकारयुक्तिषु ॥ १८
संबुद्धौ च निषेधे च एव स्यादवधारणे ।
प्राक् पूर्वे देशकालादौ प्रत्यक् प्रत्यक्षदर्शने ॥ १९
ईषदर्थे मनाक् सम्यग् निश्चये कं सुखाम्बुयोः ।
अलं भूषणपर्याप्तिवारणेषु निगद्यते ॥ २०
आ स्मृतौ संभ्रमे मोहे कामं स्यादतिशायिनि ।
धिक् तिरस्करणे कच्चित् साधुप्रश्नप्रवृत्तिषु ॥ २१
अन्वगित्यनुगत्यर्थे समाप्ताविति भण्यते ।
प्रश्ने विशेषयोगे च स्वित् संशयविकल्पयोः ॥ २२
युगपदेककालार्थे सातत्यादेश्चिदिष्यते ।
समन्ताद्-विष्वगित्युक्तिर्विभागे पृथगुच्यते ॥ २३
इ प्रहासे इ संबन्धे नु आमन्त्रणतथ्ययोः ।
पितृप्रीतौ तथा स्वाहा तर्पणे जातवेदसः ॥ २४
सहार्थे समया ज्ञेया हंहोऽनिर्दिष्टबोधने ।
संमुखे सत् प्रतिष्ठायां तूष्णीमध्यव्यति(?) क्रमे ॥ २५

---

१ A. आवासन्यो न्यग्(?), B. आमेसान्वा(!) २ B. युः °श्लाघावि°.
३ A. शीघ्रं, B. मञ्जुः ४ A. °थोदये. ५ A. °भव°. ६ A. साम्प्रदाम°(!)
७ A. व्यञ्जने, B. अञ्जसा. ८ B. उन्मुखे च प्रशंसायां.
९ A. कृष्णीमध्यहनि°(?), B. तूष्णीमध्याद्वि°.

प्राहुर्नक्तं रजन्यर्थे दिनार्थे च दिवा दिनम् ।
संज्ञायां नामसत्तायामस्ति साध्येऽभिधीयते ॥ २६
उत्सारणे फडित्याहुर्वषट् वौषट् तु तर्पणे ।
अभि सामीप्यदूरोद्ध्र्वदेशेषु परिकीर्त्त्यते ॥ २७
सामीप्ये समया-शब्दः सामीप्ये निकषोच्यते ।
नानाऽनेकप्रकारार्थे तत्क्षणात्सपदि स्मृतः ॥ २८
चिराच्चिरेण कालस्य प्रकर्षोक्तौ चिराय-वाक् ।
दूराद् दूरेण दूरं च अविकृष्टं च देशकम् ॥ २९
लघु-शब्दोऽपि शीघ्रार्थे दूरोरात्तन्ययान्तिके(?) ।
अङ्गेत्यामन्त्रणे हाहा क्रोधकृत्यनिवारणे ॥ ३०
विकल्पेऽहह हाहेति नं(?) प्रतीते च वर्जने ।
प्रदोषे सायमित्याहुर्बाढमत्यर्थयुक्तयोः ॥ ३१
समं साकं सहार्थे च कल्यं(?) श्वरमनुद्धते ।
पश्चान्न वैरे सत्ये च ध्रुवं कृत्ये च निश्चये ॥ ३२
अभिन्नेषु पुनर्भूयो मध्येऽतः प्रणतो मतः ।
पूजायामति-सु प्रोक्तौ नीचैर्निम्नः शनैर्मनाक् ॥ ३३
प्रकटीकरणे प्रादुराविर्विश्वसितेऽनिशम् ।
बहिर्बाह्ये अधोऽधस्तात् पुरोऽग्रमिङ्गिते द्रुते ॥ ३४
तिरश्चीने तरीत्युक्तिस्तरी सत्यार्थकीर्तने ।
आहि त्वरायामाहीति आक्षेपे आहि कीर्त्यते ॥ ३५
बाहुल्यार्थे स्मृतः प्रायः उच्चैरत्यर्थतुङ्गयोः ।
ह्योऽतीते गते काले ह्यनागते श्वो निगद्यते ॥ ३६
प्रश्ने तर्के च किं प्रोक्तो वरमिष्टप्रशंसने ।
अमाशब्दः सहार्थः स्यान् निषेधे वोभिधीयते ॥ ३७
प्रहासाग्रनयोरोभिः (?) प्रतिपत्तावहा तथा ।
एकत्वेऽर्थे सकृद् विद्यादुत्कर्षे निश्चये परम् ॥ ३८

---

१ B विधीयते. २ B. दूरेवासंतवा°. ३ B. °र्धे°. ४ B. °नश्वर° (?)
५ B कथ्यं. ६ A. अहर्भिन्ने. ७ A. °ते ८ A.B. °का ९ A. °सितम्.
१० B. स्यादिभाव° (?), B. घुन्नोदित° (?) ११ A. वा प्रतीयते.

पूर्वकाछे पुरा प्राहुः प्रात्युर्वे रभसा बकात् ।[1]
नित्यं प्रतिदिनं ज्ञेयं सर्वगार्थे परि-ध्वनिः ॥ ३९
ततो(?)च्चै ज्योतिके द्योते कल्कैनसमुच्यते(?) ।
तथैत्थं स्वयं स्वार्थे हि यस्मांदिति विस्मये ।
कौत्स्ये [च] मृदुरातीक्ष्णे योऽयं कुष्ठो[3] विधीयताम् ॥ ४०

इति शब्दरत्नप्रदीपे[4] पञ्चमो[5] स्तुबक[क]ः समाप्तः ॥

---

१ B मदंभरिक्षियो नैजमेवेत्यमु(?)च्यते । २ B. °द्दविस्मयः स्मृतः ।
३ B. °ष्ठयमिधीयते । ४ B adds श्लोकाधिकारः ५ B. °मः
६ B. काण्डः

# Appendix I

## Index of Homonyms


| | मण्डल | श्लोक |
|---|---|---|
| अक्ष | १ | ७६ |
| अग्र | २ | ६० |
| अघस् | ३ | ६ |
| अङ्क | २ | १८ |
| अज | ३ | ४ |
| अत्यय | २ | १४ |
| अद्रि | ३ | ३ |
| अन्तर | १ | ३० |
| अन्ध | ३ | १८ |
| अभिख्या | २ | ४ |
| अभिरूप | ३ | २५ |
| अमृत | २ | ४१ |
| अम्बर | ३ | ११ |
| अरविन्द | २ | ८४ |
| अरिष्ट | १ | ३१ |
| अर्क | ३ | २१ |
| अर्जुन | १ | २७ |
| अर्थ | २ | ६१ |
| अलीक | ३ | ३१ |
| अवट | ३ | ३० |
| अवि | २ | १० |
| अष्टापद | १ | ९० |
| अहि | १ | ४५ |
| आजि | २ | ३९ |
| आडम्बर | २ | २४ |
| आत्मन् | २ | १२ |
| आलि | २ | ३८ |
| आशा | ३ | २५ |
| इडा | २ | १६ |
| इन्द्र | १ | ४४ |
| इला | ३ | ३ |
| उत्पल | २ | ८० |
| उदान | ३ | १२ |
| उद्दान | ३ | १२ |
| उद्यान | २ | ६० |
| उपह्वर | २ | २६ |
| एक | २ | ९ |
| ओघ | ३ | २ |
| ओजस् | ३ | २४ |
| क | १ | १९ |
| ककुद् | २ | १७ |
| कक्षा | २ | ५ |
| कङ्केरु | २ | ४६ |
| कण्ठ | ३ | १४ |
| कदम्ब | १ | ७४ |
| कन्द | २ | ५८ |
| कपर्द | २ | २४ |
| कबन्ध | २ | १८ |
| कमर | ३ | १८ |
| कमल | १ | ८७—८८ |
| कम्बल | १ | ३२ |
| कर | २ | ५९ |
| करट | २ | ४५ |
| करण | १ | ८५ |
| करभ | ३ | ९ |
| करवीर | २ | ७१ |
| करीर | २ | ८ |
| कलवात | २ | ८१ |
| कला | २ | ४७ |
| कलि | ३ | १४ |
| कलिङ्ग | २ | ८८ |
| कल्क | ३ | ११ |
| कल्प | १ | ६४ |
| | २ | ११ |
| कशिपु | २ | २३ |
| कशेरुक | २ | २९ |
| कश्मल | २ | २७ |
| काण्ड | १ | ३९ |
| कान्तार | १ | ९५ |
| काय | ३ | ५ |
| काव्य | २ | ७८ |
| काश्य | ३ | ७ |
| काष्ठा | १ | ६१ |
| किङ्किणी | ३ | २७ टी |
| किरि | ३ | १५ |
| किषि | २ | ८७ |
| कीकस | २ | ५४ |
| कीनाश | २ | ३० |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| कीर | २ | २१टी | क्षेत्र | २ | ८ | ज्योति | २ | ४३ |
| | ३ | १६ | खट्ट | ३ | १३ | तन्त्र | १ | ३६ |
| कीलाल | १ | २२ | खर | १ | ७८ | तरस | २ | ५२ |
| कुण्डल | २ | ८६ | खजूर | १ | ९६ | तल्प | २ | ३ |
| कुतप | १ | १४ | खल | २ | ३६ | तात | ३ | २९ |
| कुथ | १ | १३ | गन्धर्व | १ | ८२ | ताल | १ | ६० |
| कुन्तल | १ | ३४ | गर्त्तु(?) | २ | ८९ | तिलक | १ | ८१ |
| कुन्त्या | २ | ४१ | गन्धर्व | १ | ८२ | तीक्ष्ण | २ | ७६ |
| कुरुविन्द | २ | ७० | गुरु | १ | ९७ | तुरायण | २ | ६४ |
| कुल | २ | ३१ | गुह्य | ३ | २२ | तुषार | २ | ४७ |
| कुशल | २ | १२ | गो | १ | १५ | तुवर | २ | २५ |
| कुशि | २ | ८७ | गोत्र | १ | ५३ | तृष्णा | ३ | ७ |
| कूट | २ | १५ | गोविन्द | ३ | ४ | त्र्यम्बक | २ | ३४ |
| कृत्य | ३ | २३ | गौरी | १ | ५ | दया | ३ | १९ |
| कृष्णा | २ | ८१ | घन | १ | ५४ | दर | ३ | २ |
| | ३ | २८ | घनाघन | २ | ६ | दल | २ | ३९ |
| केतु | २ | २८ | घृणा | २ | ७५ | दायाद | २ | २० |
| कैवर्त्त | २ | ६८ | चक्र | १ | ७७ | दाव | ३ | १० |
| कोण | १ | ५९ | चन्दन | २ | ६९ | द्विजिह्व | २ | ५१ |
| कोल | ३ | १४ | चन्द्र | ३ | १५ | दीन | ३ | २३ |
| कोश | २ | ६७ | चिकुर | ३ | १० | दीप्ति | ३ | २७ |
| कौशिक | ३ | १७ | चित्रक | १ | ६८ | दुन्दुभि | २ | ५९ |
| क्रोड | ३ | १९ | चीवर | ३ | २८ | दुरोदर | २ | ४३ |
| क्लीब | २ | २१ टी | छाया | ३ | १९ | दृष्टि | ३ | २८ |
| क्षण | १ | ४२ | जाति | १ | ७९ | देव | १ | १७ |
| क्षय | ३ | १३ | जामि | ३. | २५ | द्रुम | ३ | २० |
| क्षिति | ३ | १३ | जिन | १ | ५६ | द्रोण | १ | ७० |
| क्षुद्र | १ | ९ | जीमूत | ३ | १० | द्विज | ३ | ३१ |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| द्विजराज | २ | ६८ | निस्त्रंस | ३ | १२ | प्रज्ञान | ३ | २६ |
| धन्वन् | २ | १९ | नृशंस | २ | २५ | प्रतिग्रह | १ | ७३ |
| धर | २ | ५६ | नेत्र | १ | ३७ | प्रतिबन्ध | २ | ८६ |
| धव | २ | ३३ | प्लक्ष | २ | ७ | प्रतिरोधक | २ | ७४ |
| धातु | १ | ३८ | पट्ट | १ | २८ | प्रत्यय | २ | १३ |
| धात्री | १ | ६९ | पतङ्ग | ३ | २१ | प्रधान | २ | ८३ |
| धाम | २ | १४ | पत्र | २ | ६७ | प्रमाण | २ | ४४ |
| धावन | २ | ६३ | पद | २ | १३ | प्रदर | ३ | ९ |
| धिष्ण्य | २ | ३ | पयस् | ३ | १ | प्रवाल | १ | ५८ |
| धीर | ३ | २१ | पयोधर | ३ | २५ | प्रहि | ३ | १४ |
| धुन | २ | ११ | पराक्रम | ३ | २७ | प्राजिक | २ | ९१ |
| धेनु | १ | ४७ | परायण | २ | ६५ | प्राध्व | ३ | ४६ |
| ध्रुव | ३ | २० | परिघ | २ | ५५ | प्राप्ति | ३ | २६ |
| ध्वाङ्क्ष | ३ | १२ | पक्ष | २ | ३८ | प्रियक | १ | ७५ |
| ध्वान | २ | ७९ | पलल | १ | २३ | प्लवक | ३ | २७ |
| नग | ३ | १२ | पलाश | १ | ६२ | फण | १ | ८० |
| नन्दन | २ | ६२ | पात्र | २ | ६६ | बभ्रु | ३ | २३ |
| नाग | २ | ३१ | पिप्पल | २ | ६९ | बर्हिस् | ३ | १५ |
| नाभि | १ | ५२ | पीलु | ३ | ९ | बल | १ | ७२ |
| निज | ३ | २४ | पुण्डरीक | १ | ८६ | बलि | १ | २९ |
| निदाघ | २ | २८ | पुण्य | २ | ३५ | बहुल | २ | ५७ |
| निमित्त | ३ | ३० | पुरुहूत | २ | ४० | बाल | १ | ९१–९२ |
| निर्व्यूह | २ | ९ | पुलाक | २ | ७ | बाष्प | ३ | ८ |
| निवात | २ | ३० | पुष्कर | १ | १८ | ब्रह्म | २ | ३५ |
| निष्क | २ | १८ | पुष्प | २ | ३३ | भग | १ | १६ |
| | २ | ५८ | पूग | २ | ३२ | भङ्ग | २ | ७५ |
| | ३ | ८ | पूर | ३ | २० | भषक | २ | ७३ |
| निस्त्रिंश | ३ | ८ | प्रकोष्ठ | २ | २१ | भानु | ३ | ३ |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| भाव | १ | १२ | यज्ञ | ३ | २८ | वर्म | २ | १९ |
| भुवन | ३ | ७ | योग | १ | ५० | वर्द्धन | २ | २९ |
| भूत | १ | ८९ | रजनी | २ | ५५ | वर्द्धन | २ | ६१ |
| भूरि | २ | ७२ | रमणी | २ | ८३ | वर्षा | २ | १९ |
| भृशुण्डिन् | २ | ७७ | रम्भा | २ | ४ | वल्लव | ३ | १० |
| भ्रूण | १ | ४३ | रस | १ | ५१ | वसति | ३ | ५ |
| मघा | २ | ५० | राजा | ३ | १ | वसु | १ | २५ |
| मणि | २ | ४८ | राढा | २ | ३७ | वाज | २ | ४९ |
| मण्डल | २ | ३३ | राम | १ | ५५ | वाडव | ३ | ७ |
| मत(?) | ३ | ३१ | रीढा | २ | २७ | वारि | २ | ७१ |
| मत्स्य | ३ | २९ | रुक्म | २ | ७९ | वारुणी | २ | ५२ |
| मधु | १ | ८ | रुधिर | २ | ६२ | वाल्मीक | २ | ९० |
| मधुर | ३ | २२ | रूप | ३ | २९ | वागुरा | २ | ८० |
| मन्द | २ | ४४ | रोमन्थ | २ | ५४ | वाह | १ | १० |
| मन्दुरा | २ | ५२ | रोहित | १ | ७१ | वाह्लीक | १ | ९५ टी |
| मन्यु | २ | ५६ | लक्ष्मण | २ | ९२ | विग्रह | २ | २१ |
| मरुत् | २ | ८५ | ललाम | १ | २४ | वितान | २ | २२ |
| मात्रा | २ | १६ | लाङ्गल | ३ | १५ | विश्वावसु | ३ | २६ |
| मानस | २ | ६३ | लीक (!) | ३ | २७ | विष | २ | ४८ |
| माया | २ | ८५ | वंश | २ | ६५ | वीर | ३ | १६ |
| मार्गण | २ | ७६ | वत्स | ३ | १९ | वीर्य | २ | ५० |
| | ३ | १७ | वधू | २ | २३ | वृजिन | ३ | २६ |
| माल्य | २ | ३७ | वन | ३ | २ | वृष | १ | ४८ |
| मित्र | ३ | २ | वप्र | २ | २ | | ३ | ११ |
| मृणाल | २ | ७८ | वर | ३ | २१ | वृषाकपि | ३ | ४ |
| मृत्यु | २ | ४२ | वर्चस् | ३ | ५ | वेला | १ | ४१ |
| मृदु | ३ | ३० | वर्ण | १ | २६ | व्यक्त | ३ | २१ |
| मोचा | २ | ५ | वर्ति | २ | ८८ | व्याड | २ | २ |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| व्याल | १ | ४६ | श्रम | ३ | १३ | सुधा | १ | ४० |
| व्रज | २ | ४९ | श्रोत्र | ३ | २९ | सुमनस् | २ | ३९ |
| शम्भु | ३ | २२ | सयद्वर | २ | ८२ | सूत | २ | ७३ |
| शय्या | २ | ५१ | संवर | २ | १० | सूद | २ | ७२ |
| शर्वर | २ | ८२ | संगर | २ | ४० | सूनृत | २ | ५३ |
| शलि | १ | ४९ | संज्ञा | ३ | ३ | सूर | ३ | २० |
| शारद | २ | २६ | | १ | २१ | सौवीर | २ | ७४ |
| शाल | ३ | ६ | सती | २ | २२ | स्तोक | ३ | ६ |
| शाला | २ | ३६ | सत्र | १ | ६३ | स्थाणु | ३ | ४ |
| शिखण्ड | २ | ६६ | सद् | २ | १७ | स्थूल | ३ | ३१ |
| शिखण्डिन् | २ | ७७ | सन्धा | ३ | ५ | स्यन्दन | २ | ६४ |
| शिलीमुख | ३ | ८ | समर | ३ | १८ | स्व | २ | १५ |
| शिल्प | २ | १६टी | समर्थ | ३ | ३० | हंस | १ | २० |
| शिव | १ | ४ | समाज | २ | ९१ | हर | २ | १६टी |
| शुक | १ | ५७ | समिति | १ | ६६ | हरि | १ | ६–७ |
| शुचि | २ | ६ | संपा | २ | ४२ | हरिण | २ | ४५ |
| शुभा | १ | ९४ | सरल | २ | ५७ | हायन | ३ | २४ |
| शृगाल | २ | ८४ | सस्य | २ | ७० | हार | १ | ११ |
| शृङ्ग | १ | ८३ | सायक | ३ | १७ | हाव | ३ | ९ |
| शेलु | २ | ८९ | सारंग | १ | ८४ | हीर | ३ | १६ |
| शैल | २ | ९० | सित | १ | ६७ | हेति | ३ | २४ |
| शोण | ३ | ११ | सिन्धु | ३ | ६ | हेतु | ३ | १६ |
| श्यामा | १ | ६टी | सिफा | २ | ३४ | | | |
| | १ | ९२ | सीता | १ | ५१ | | | |

# Appendix II

## Index of Technical Terms


| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| अक्लिष्ट | ४ | ३५ | आवपन | ४ | ४५ | काम्बोज | ४ | १६ |
| अग्रेदिधिषु | ४ | ४४ | आषाढ | ४ | ६५ | कात्यायनी | ४ | ७३ |
| अधमर्ण | ४ | ३९ | आसार | ४ | ४२ | काल्या | ४ | २० |
| अध्वर्यु | ४ | ६४ | आस्य | ४ | ७५ | किशोरक | ४ | १६ |
| अनय | ४ | १८ | आहोपुरुषिका | ४ | ३१ | कुप्य | ४ | ३७ |
| अनामिका | ४ | २६ | इरम्मद | ४ | ४२ | कुशीद | ४ | १८ |
| अनीकस्थ | ४ | ३ | इल्वला | ४ | ५९ | कुहू | ४ | ६१–६२ |
| अनुमति | ४ | ५९–६० | इष | ४ | ५६ | कूकद | ४ | ५३ |
| अनेडमूक | ४ | ५८ | इष्टापूर्त | ४ | ६७ | कूबर | ४ | १८ |
| अन्तर्वेश्मिक | ४ | ३ | उत्तमर्ण | ४ | ३९ | कूर्च | ४ | ७३ |
| अन्वाहार्य | ४ | ६९ | उद्गातृ | ४ | ६५ | कौमोदकी | ४ | ८१ |
| अपराद्धेषु | ४ | ६ | उपत्यका | ४ | २३ | गणरात्रम् | ४ | ५० |
| अपसर्प | ४ | ११ | उपरक्त | ४ | ५३ | गव्यूति | ४ | ४८ |
| अपस्कर | ४ | १८ | उपाकृत | ४ | ६८ | गुल्फ | ४ | ७४ |
| अभिभय | ४ | ११ | उपाध्याय | ४ | ७७–७८ | गुल्म | ४ | १० |
| अभिषेणक(न) | ४ | ७ | ऊर्ज | ४ | ५६ | गोकर्ण | ४ | २७ |
| अरत्नि | ४ | २८ | एकायन | ४ | ५७ | ग्रस्त | ४ | ३३ |
| अवकेशिन् | ४ | ४६ | एडूक | ४ | ५१ | ग्राम्य | ४ | ३६ |
| अवार | ४ | २३ | ओदन | ४ | ७९ | चित्रधेनु | ४ | ८३ |
| अश्वकाङ्ग | ४ | १७ | कनिष्ठा | ४ | २६ | चित्रपद | ४ | ३६ |
| असद्ग्राह्य | ४ | ३४ | कबन्ध | ४ | ९ | चिररात्रम् | ४ | ५० |
| आचार्य | ४ | ७६–७७ | करभ | ४ | २५ | छेक | ४ | ४५ |
| आजानेय | ४ | १६ | कर्मसचिव | ४ | २ | जघन | ४ | ७४ |
| आतोद्य | ४ | ३८ | कल्य | ४ | २९ | ज्येष्ठा | ४ | २६ |
| आधोरण | ४ | १५ | कल्या | ४ | ३५ | तण्डुल | ४ | ७८ |
| आलान | ४ | १३ | कव्य | ४ | ७१ | तपस् | ४ | ५७ |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| तपस्य | ४ | ५७ | निरत | ४ | ३३ | प्रादेश | ४ | २७ |
| तारका | ४ | ७३ | निषादी | ४ | १५ | प्रावृष् | ४ | ४२ |
| ताल | ४ | २७ | निष्ठुर | ४ | ३४ | प्रासाद | ४ | ७५–७६ |
| तैजस | ४ | ४६ | नैचिकी | ४ | १९ | प्रियाप्रिया | ४ | ३५ |
| त्रयी | ४ | ६२ | पक्व | ४ | ३२ | प्रोथ | ४ | १७ |
| त्रिवर्ग | ४ | ७० | पक्षिणी | ४ | ४९ | बभ्रु | ४ | ४० |
| दण्डनीति | ४ | ६३ | पञ्चालिका | ४ | ५२ | बाल्हीक | ४ | १६ |
| दम | ४ | १० | पद्म | ४ | १५ | ब्रह्मचर्य | ४ | ६८ |
| दर्श | ४ | ६९ | पद्या | ४ | ४८ | भारतवर्ष | ४ | ५२ टी |
| दिक्पाल | ४ | ८० | पाञ्चजन्य | ४ | ८१ | भृङ्गार | ४ | ४६ |
| दिग्ध | ४ | १२ | पाटल | ४ | ४१ | मकरन्द | ४ | ३० |
| दिधिषू | ४ | ४४ | पादबन्धन | ४ | ३७ | मद | ४ | १४ |
| दिव्य | ४ | ७० | पार | ४ | २३ | मधु | ४ | ५४ |
| दीक्षित | ४ | ६६ | पिशङ्ग | ४ | ४० | मलिन | ४ | २४ |
| दीर्घदर्शी | ४ | १९ | पुराण | ४ | ८४ | महाधन | ४ | ३० |
| देवमातृक | ४ | ४३ | पुष्ट | ४ | ३२ | महोत्साह | ४ | १२–१३ |
| दैव | ४ | १८ | पोगण्ड | ४ | ५४ | माधव | ४ | ५४ |
| द्रप्स | ४ | २२ | प्रकीर्णक | ४ | २९ | मित्र | ४ | ५ |
| धार्तराष्ट्र | ४ | २४ | प्रकोष्ठ | ४ | २५ | मेचक | ४ | ४१ |
| धूम्र | ४ | ४० | प्रणिधि | ४ | ४ | यष्टृ | ४ | ६७ |
| धौरित | ४ | १७ | प्रतल | ४ | २८ | रत्न | ४ | ३२ |
| नदीमातृक | ४ | ४३ | प्रतिरोध | ४ | ८ | रत्नि | ४ | २८ |
| नन्दक | ४ | ८१ | प्रतिसर | ४ | ८ | राका | ४ | ५९–६० |
| नभस् | ४ | ५५ | प्रत्यासार | ४ | ७ | रूप्य | ४ | ३७ |
| नभस्य | ४ | ५५ | प्रदेशिनी | ४ | २६ | वत्सतर | ४ | २१ |
| नितम्ब | ४ | ७४ | प्रष्ठौही | ४ | २१ | वमथु | ४ | १४ |
| निबन्धन | ४ | १० | प्राचीनावीतिन् | ४ | ७१ | वरारोहा | ५ | ७२ |
| निरर्थक | ४ | ३४ | प्राजितृ | ४ | १५ | वरूथ | ४ | १० |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| वर्षधर | ४ | ५ | व्याम | ४ | २६ | सहस्य | ४ | ५६ |
| वषट् | ४ | ६७ | व्यूह | ४ | ६ | सानु | ४ | २३ |
| वस्त्र | ४ | २९ | व्रात्य | ४ | ६६ | सान्त्व | ४ | ३४ |
| वाग्म | ४ | ३३ | शत्रु | ४ | ५ | सान्नाय्य | ४ | ६५ |
| वाज | ४ | ६ | शब्द | ४ | ८५ | सारिक | ४ | ५ |
| वात्या | ४ | ५९ | शब्दलोक | ४ | ५१ | सित | ४ | २४ |
| वार्धुषिक्य | ४ | ३९ | शाखानगर | ४ | ४७ | सुव्रता | ४ | २० |
| वार्ता | ४ | ६३ | शिनीवाली | ४ | ६०–६१ | सृणि | ४ | १४ |
| विकुल | ४ | ४७ | शिवगङ्गा | ४ | ८२ | सेनाङ्ग | ४ | ८ |
| विकूणिका | ४ | ३९ | शीकर | ४ | ४२ | सैरन्ध्री | ४ | ७२ |
| विटप | ४ | ३१ | शुक्र | ४ | ५५ | सोमप | ४ | ६५ |
| वितस्ति | ४ | २७ | शुक्ति | ४ | ५५ | सौध | ४ | ७६ |
| विनीतक | ४ | १६ | शृङ्गिन् | ४ | ३७ | स्तबक | ४ | ३० |
| विषुवत् | ४ | ५८ | शोण | ४ | ४१ | स्थायुष(क) | ४ | ४ |
| विस्फार | ४ | ९ | श्वेत | ४ | ४० | स्मृति | ४ | ६४ |
| वीरपानक | ४ | ९ | संसप्तक | ४ | ४८ | स्वगत | ४ | ३५ |
| वीरहन् | ४ | ६६ | संधि | ४ | ७५ | हरित् | ४ | ४१ |
| वीरा | ४ | ७२ | संधिनी | ४ | २१ | हव्य | ४ | ७१ |
| वृन्त | ४ | ३१ | समामा | ४ | २० | हिरण्य | ४ | ३६ |
| बृंहित | ४ | १३ | सम्राज् | ४ | १ | हैयङ्गवीन | ४ | २२ |
| वेश | ४ | ३८ | सहस् | ४ | ५६ | होतृ | ४ | ६४ |
| वेहत् | ४ | १९ | | | | | | |

# Appendix III

## Index of Indeclinables

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| अङ्ग | ५ | ३० | उत | ५ | १० | ध्रुवम् | ५ | ३२ |
| अञ्जसा | ५ | १८ | उरी | ५ | १५ | न | ५ | ८ |
| अतस् | ५ | १० | ऊररी | ५ | १५ | नक्तम् | ५ | २५ |
| अति | ५ | ३३ | ऊरी | ५ | १५ | न–परम् | ५ | ६ |
| अथ | ५ | १८ | ए | ५ | १३ | नाना | ५ | २८ |
| अन्तरा | ५ | ११ | एव | ५ | १६–१९ | निकषा | ५ | २८ |
| अन्तरेण | ५ | ११ | कच्चित् | ५ | २१ | नित्यम् | ५ | ३९ |
| अन्वक् | ५ | २२ | कम् | ५ | २० | नीचैस् | ५ | ३३ |
| अपि | ५ | ७ | किम् | ५ | ३७ | नु | ५ | ९ |
| अभि | ५ | २७ | किमुत | ५ | ९ | | ५ | १३ |
| अमा | ५ | ३७ | किल | ५ | ७ | | ५ | २४ |
| अयि | ५ | १२–१६ | खलु | ५ | १७ | परम् | ५ | ५ |
| अरे | ५ | १३ | च | ५ | २ | परि | ५ | ३९ |
| अलम् | ५ | २० | चिरात् | ५ | २९ | पश्चात् | ५ | ३२ |
| अस्ति | ५ | २६ | चिराय | ५ | २९ | पुनर् | ५ | १०–११ |
| अहह | ५ | ३१ | चिरेण | ५ | २९ | पुरस् | ५ | ३४ |
| अहो | ५ | ५ | चेत् | ५ | २३ | पुरा | ५ | ३९ |
| आ | ५ | २१ | जातु | ५ | १६ | प्रगे | ५ | ११ |
| आम् | ५ | ८ | ततस् | ५ | १० | प्रत्यक् | ५ | १९ |
| आविस् | ५ | ३४ | तरी | ५ | ३५ | प्राक् | ५ | १९ |
| आहि | ५ | ३५ | तूष्णीम् | ५ | २५ | प्रादुर् | ५ | ३४ |
| आहोस्वित् | ५ | १६ | दिवा | ५ | २५ | प्रायस् | ५ | ३६ |
| इ | ५ | २४ | दूरम् | ५ | ३९ | फट् | ५ | २७ |
| इति | ५ | ९ | दूरात् | ५ | ३९ | बत | ५ | ६ |
| इव | ५ | ९ | दूरेण | ५ | ३९ | बहिस् | ५ | ३४ |
| उच्चैस् | ५ | ३६ | धिक् | ५ | २१ | बाढम् | ५ | ३१ |

| | मण्डल | श्लोक | | मण्डल | श्लोक | | मण्डल | श्लोक |
|---|---|---|---|---|---|---|---|---|
| भूयस् | ५ | ३३ | वा | ५ | ३ | सुष्ठु | ५ | ११ |
| मङ्क्षु | ५ | १५ | विष्वञ्च् | ५ | २३ | स्वयम् | ५ | ४० |
| मध्ये | ५ | ३३ | वै | ५ | १५ | स्वाहा | ५ | २४ |
| मनाक् | ५ | २० | वौषट् | ५ | २७ | स्वित् | ५ | २२ |
| मा | ५ | १७ | सकृत् | ५ | ३८ | हन्त | ५ | ४ |
| मा स्म | ५ | ८ | सपदि | ५ | २८ | हा | ५ | ४ |
| मिथस् | ५ | १० | समम् | ५ | ३२ | | ५ | १३ |
| मुधा | ५ | ११ | समया | ५ | २४–२८ | हाहा | ५ | ३०–३१ |
| युगपत् | ५ | ४३ | सम्यञ्च् | ५ | २० | हि | ५ | ४ |
| रभसा | ५ | ३९ | साकम् | ५ | ३२ | | ५ | ४० |
| लघु | ५ | ३० | सायम् | ५ | ३१ | हे | ५ | १३ |
| वरम् | ५ | ३७ | सु | ५ | ३३ | ह्यस् | ५ | ३६ |

# राजस्थान पुरातन ग्रन्थमाला

## प्रकाशित ग्रन्थ

१ प्रमाणमञ्जरी – तार्किकचूड़ामणि सर्वदेव। २ यन्त्रराजरचना – महाराजाधिराज जयसिंहदेव कारिता। ३ कान्हडदे प्रबन्ध – महाकवि पद्मनाभ। ४ क्यामखांरासा – नवाब अलफखां (कविवर जान)। ५ लावारासा – चारण कविया गोपालदान। ६ महर्षिकुलवैभवम् – विद्यावाचस्पति स्व. श्री मधुसूदनजी ओझा। ७ वृत्तिदीपिका – मौनि कृष्णभट्ट। ८ राजविनोद काव्य – कवि उदयराज। ९ तर्कसंग्रहफक्किका – क्षमाकल्याणगणी। १० वृत्तसंग्रह – अज्ञातकर्तृक। ११ शृंगारहारावलि – हर्षकवि। १२ कृष्णगीति – कवि सोमनाथ। १३ कारकसंबन्धोद्योत – पं. रभसनन्दी। १४ शब्दरत्नप्रदीप – अज्ञातकर्तृक।

## प्रेस में

१ त्रिपुराभारतीलघुस्तव – सिद्धसारस्वत [illegible] व्याकरण – ठक्कुर संग्रामसिंह। ३ करुणामृतप्रपा – मह[illegible] ४ पदार्थरत्नमञ्जूषा – पं. कृष्णमिश्र। ५ शकुनप्रदीप – [illegible] रत्नाकर – पं. साधुसुन्दर गणी। ७ प्राकृतानन्द – [illegible] विलासकाव्य – पं. कृष्णभट्ट। ९ चक्रपाणिविजयकाव्य – [illegible]। १० काव्यप्रकाश – भट्ट सोमेश्वर। ११ नृत्यरत्न कोश – महाराजाधिराज कुंभकर्णदेव। १२ नन्दोपाख्यान – अज्ञातकर्तृक। १३ चान्द्रव्याकरण – चन्द्रगोमी। १४ रत्नकोश – अज्ञातकर्तृक। १५ कविकौस्तुभ – पं. रघुनाथ मनोहर। १६ एकाक्षरकोशसंग्रह – विविधकविकर्तृक। १७ शतकत्रयम् – भर्तृहरि, धनसारकृत व्याख्यायुक्त। १८ वसन्तविलास – अज्ञातकर्तृक। १९ दुर्गापुष्पाञ्जलि – म. म. पं. दुर्गाप्रसादजी द्विवेदी। २० दशकण्ठवधम् – म. म. पं. दुर्गाप्रसादजी द्विवेदी। २१ गोरा बादल पदमिणी चऊपइ – कवि हेमरतन। २२ बांकीदासरी ख्यात – महाकवि बांकीदास। २३ मुंहता नैणसीरी ख्यात – मुंहता नेणसी इत्यादि।

प्राप्तिस्थान – सञ्चालक, राजस्थान पुरातत्त्वान्वेषण मन्दिर, जयपुर।